# Guhyashodhanyasa Upanishad

# ગુહ્યષોઢાન્યાસોપનિષત્

## Document Information

Text title : guhyaShoDhAnyAsopaniShat

File name : guhyaShoDhAnyAsopaniShat.itx

Category : upanishhat, devii, devI, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# ગુહ્યષોઢાન્યાસોપનિષત્

અથ ગુહ્યાં ન્યસેત્ । શિવો ભવેત્ । શક્તિરૂપો ભવેત્ । વિદ્યારાજ્ઞીન્યાસમેવં ચરેત્ । ન જપો ન પૂજા ન સાધનં ન કાલનિયમો ન દિવા ન રાત્રિઃ । સર્વકાલં ન્યસેત્ । શક્તિયુક્તો ભવેત્ । યથાધિકારવાન્ ન્યસેત્ । પૂર્ણદીક્ષાં લભેત્ । ષોઢારૂપો ભવેત્ । ચિન્તામણિર્ભવેત્ । ક્રીં માતૃસ્થાને ન્યસેત્ । પરાત્ પરતરો ભવેત્ । શિવો ભવેદિત્યેકઃ । અથ તારાદ્વયપુટિતાં માતૃકાં માતૃકાપુટિતાં તાં માતૃકાસ્થાને ન્યસેત્ । પરાતીતારૂપો ભવેદિતિ દ્વિતીયઃ । અથ શક્તિકાદ્વયપુટિતાં માતૃકાં માતૃકાપુટિતાં તાં ન્યસેત્ । તુર્યારૂપો ભવેત્ । તૃતીયકલારૂપો ભવેત્ । કાલસઙ્કલનાત્ કાલી । સહેલં સલીલં વા સ્મરણાદ્વરદાનેષુ ચતુરા । તેનેયં દક્ષિણા । સમ્બોધનદ્વયપુટિતાં માતૃકાં માતૃકાપુટિતં નામદ્વયં લિપિસ્થાને ન્યસેત્ । તુર્યાત્ પરારૂપો ભવેત્ । ચતુર્થીકલારૂપો ભવેત્ । લોકપાલસંવાદિની ચતુર્થી । અથ પઞ્ચમીં કલાં ન્યસેત્ । પઞ્ચમીકલારૂપો ભવેત્ । સુભગાત્રયં કૂર્ચવહ્નિલલનાં વહ્નેસ્ત્રિકોણદૈવતસ્ય લાલનાચ્છ્રીકણ્ઠરૂપસ્તુર્યા પરાતીતા । એતત્પુટિતમાતૃકાપુટિતમેતન્મન્ત્રં માતૃકાસ્થાને ન્યસેદિતિ પઞ્ચમી । શિવત્વં ગચ્છતિ । સ સર્વરૂપો ભવેત્ । અથ ષષ્ઠીં કલાં ન્યસેત્ । પૂર્ણાં વિદ્યારાજ્ઞીં લિપિસ્થાને ન્યસેદ્વ્યાપયેત્ । સ શિવો ભવેત્ । સ સર્વજ્ઞત્વં ગચ્છતિ । સ કવિર્ભવેત્ । સ સંન્યાસી ભવેત્ । દેવો હ વૈ ભવેત્ । વિશ્વરૂપો ભવેત્ । અયુતં ન્યસેત્ । ઋષિચ્છન્દાદિ પૂર્વવદ્ભવેત્ । બ્રહ્માણ્ડગોલકેઽપિ યા જગતીતલે તાં સર્વાં ભુનક્તિ । યસ્યાઃ સ્મરણાત્ સિદ્ધો નિદેશવર્તી ચ ભવેત્ તાં ન્યસેત્ । ન્યસનં ન્યાસઃ । સમ્યક્ ન્યાસઃ સન્ન્યાસઃ । ન તુ મુણ્ડિતમુણ્ડઃ । તસ્ય દેવાદયો નમસ્યન્તીતિ પ્રોતં વેદ । ૐ શિવમ્ ॥

(શાક્ત-ઉપનિષદઃ)

ઇત્યાથર્વણે સૌભાગ્યકાણ્ડે ગુહ્યષોઢાન્યાસોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Guhyashodhanyasa Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*